শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ দ্বিচৎৱারিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ দ্বিচৎৱারিংশঃ সর্গঃ ॥

## অংশুমতো ভগীরথস্য চ তপস্যা ব্রহ্মণা ভগীরথস্যাভীষ্টং ৱরং প্রদায গঙ্গাং ধারযিতুং শিৱস্য প্রসাদনার্থং প্রযতিতুং তস্মৈ সম্মতিদানম্

কালধর্মং গতে রাম সগরে প্রকৃতীজনাঃ।
রাজানং রোচযামাসুরংশুমন্তং সুধার্মিকম্॥ **1.42.1** ॥

স রাজা সুমহানাসীদংশুমান্ রঘুনন্দন।
তস্য পুত্রো মহানাসীদ্ দিলীপ ইতি ৱিশ্রুতঃ॥ **1.42.2** ॥

তস্মৈ রাজ্যং সমাদিশ্য দিলীপে রঘুনন্দন।
হিমৱচ্ছিখরে রম্যে তপস্তেপে সুদারুণম্॥ **1.42.3** ॥

দ্বাত্রিংশচ্ছতসাহস্রং ৱর্ষাণি সুমহাযশাঃ।
তপোৱনগতো রাজা স্বর্গং লেভে তপোধনঃ॥ **1.42.4** ॥

দিলীপস্তু মহাতেজাঃ শ্রুৎৱা পৈতামহং ৱধম্।
দুঃখোপহতযা বুদ্ধ্যা নিশ্চযং নাধ্যগচ্ছত॥ **1.42.5** ॥

কথং গঙ্গাৱতরণং কথং তেষাং জলক্রিযা।
তারযেযং কথং চৈতানিতি চিন্তাপরোঽভৱৎ॥ **1.42.6** ॥

তস্য চিন্তযতো নিত্যং ধর্মেণ ৱিদিতাত্মনঃ।
পুত্রো ভগীরথো নাম জজ্ঞে পরমধার্মিকঃ॥ **1.42.7** ॥

দিলীপস্তু মহাতেজা যজ্ঞৈর্বহুভিরিষ্টৱান্।
ত্রিংশদ্বর্ষসহস্রাণি রাজা রাজ্যমকারযৎ॥ **1.42.8** ॥

অগৎৱা নিশ্চযং রাজা তেষামুদ্ধরণং প্রতি।
ৱ্যাধিনা নরশার্দূল কালধর্মমুপেযিৱান্॥ **1.42.9** ॥

ইন্দ্রলোকং গতো রাজা স্বার্জিতেনৈৱ কর্মণা।
রাজ্যে ভগীরথং পুত্রমভিষিচ্য নরর্ষভঃ॥ **1.42.10** ॥

ভগীরথস্তু রাজর্ষির্ধার্মিকো রঘুনন্দন।
অনপত্যো মহারাজঃ প্রজাকামঃ স চ প্রজাঃ॥ **1.42.11** ॥

মন্ত্রিষ্ৱাধায তদ্ রাজ্যং গঙ্গাৱতরণে রতঃ।
তপো দীর্ঘং সমাতিষ্ঠদ্ গোকর্ণে রঘুনন্দন॥ **1.42.12** ॥

ঊর্ধ্ৱবাহুঃ পঞ্চতপা মাসাহারো জিতেন্দ্রিযঃ।
তস্য ৱর্ষসহস্রাণি ঘোরে তপসি তিষ্ঠতঃ॥ **1.42.13** ॥

অতীতানি মহাবাহো তস্য রাজ্ঞো মহাত্মনঃ।
সুপ্রীতো ভগৱান্ ব্রহ্মা প্রজানাং প্রভুরীশ্ৱরঃ॥ **1.42.14** ॥

ততঃ সুরগণৈঃ সার্ধমুপাগম্য পিতামহঃ।
ভগীরথং মহাত্মানং তপ্যমানমথাব্রৱীৎ॥ **1.42.15** ॥

ভগীরথ মহারাজ প্রীতস্তেঽহং জনাধিপ।
তপসা চ সুতপ্তেন ৱরং ৱরয সুব্রত॥ **1.42.16** ॥

তমুৱাচ মহাতেজাঃ সর্ৱলোকপিতামহম্।
ভগীরথো মহাবাহুঃ কৃতাঞ্জলিপুটঃ স্থিতঃ॥ **1.42.17** ॥

যদি মে ভগৱান্ প্রীতো যদ্যস্তি তপসঃফলম্।
সগরস্যাত্মজাঃ সর্ৱে মত্তঃ সলিলমাপ্নুযুঃ॥ **1.42.18** ॥

গঙ্গাযাঃ সলিলক্লিন্নে ভস্মন্যেষাং মহাত্মনাম্।
স্ৱর্গং গচ্ছেযুরত্যন্তং সর্ৱে চ প্রপিতামহাঃ॥ **1.42.19** ॥

দেৱ যাচে হ সন্তত্যৈ নাৱসীদেৎ কুলং চ নঃ।
ইক্ষ্ৱাকূণাং কুলে দেৱ এষ মেঽস্তু ৱরঃ পরঃ॥ **1.42.20** ॥

উক্তৱাক্যং তু রাজানং সর্ৱলোকপিতামহঃ।
প্রত্যুৱাচ শুভাং ৱাণীং মধুরাং মধুরাক্ষরাম্॥ **1.42.21** ॥

মনোরথো মহানেষ ভগীরথ মহারথ।
এৱং ভৱতু ভদ্রং তে ইক্ষ্ৱাকুকুলৱর্ধন॥ **1.42.22** ॥

ইযং হৈমৱতী জ্যেষ্ঠা গঙ্গা হিমৱতঃ সুতা।
তাং ৱৈ ধারযিতুং রাজন্ হরস্তত্র নিযুজ্যতাম্॥ **1.42.23** ॥

গঙ্গাযাঃ পতনং রাজন্ পৃথিৱী ন সহিষ্যতে।
তাং ৱৈ ধারযিতুং রাজন্ নান্যং পশ্যামি শূলিনঃ॥ **1.42.24** ॥

তমেৱমুক্ত্বা রাজানং গঙ্গাং চাভাষ্য লোককৃৎ।
জগাম ত্রিদিৱং দেৱৈঃ সর্ৱৈঃ সহ মরুদ্গণৈঃ॥ **1.42.25** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে দ্বিচৎৱারিংশঃ সর্গঃ ॥